अंशूनपं गृह्णाति त्रायंत एवैनंप्राणा वा अंशवः TaiS. Vi. iv.4.4; **1C** to take away from तदेनमपाग्रहीत्तेन सोऽपतरं पापीयान्भवति MaiS. i.6.8 (i.98.18); उच्चैः सदो मिनुयाद् वृष्टिमेवापाग्रहीत् MaiS. iii.8.9 (iii.109.1); अथ तृणमेकमपगृह्णाति ... तस्माऽएवास्यैतदात्मानमपगृह्णाति ŚatBr. (K.) II.viii.1.16; न च फलं वृक्षम् अपगृह्णाति Nyās. i.1026.3 (*on* iv.3.163); **1D** to tear off, MW.; **2** to disfavour, cf. **अपग्रह** *m.*; **3** to know wrongly, cf. **अपग्रहा**.

**अपग्रह** (apa-graha) *m.* **1** disfavour स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया ŚiśuVa. 1.71; शक्नोत्यनुग्रहमभीक्ष्णमपग्रहं च कर्तुं महान् हि महतः समये महस्वी HarVi. 8.40; **2** prisoner प्रग्रहोऽपग्रहो बन्दी कारा बन्धनवेश्मनि ŚabdaRa. (Vā.) 2788.

**अपग्रहण** (apa-grahana) *adj.* which is taken away सव्यापग्रहणो वज्रो दक्षिणाविसर्जनः KāṭhS. 21.2 (ii.38.5); KapiKaS. 31.17 (164.14); MaiS. iii.2.10 (iii.31.15).

**अपग्रहा** (apa-grahā) *adj.* (*f.*) having wrong or distorted knowledge स्थितास्वल्पावशिष्टासु प्रजास्विह क्वचित् क्वचित्। अपग्रहास्ततस्ता वै लोभाविष्टास्तु वृन्दशः BrahmāṇḍP. i.31.92.

**अपग्राम** (apa-grāma) *adj.* expelled out of their community तस्मिन्मवसरे स्नाता निर्गतपाप्मान अपग्रामा महापातकिनः ये ग्रामाद्बन्धुभिः परित्यक्तास्ते पूता भवन्ति ŚāṅkhāŚS. xvi.18.21.

**अपग्राह** (apa-grāha) *n.* act of drawing away, अयं वाव यः पवते स प्राणस्तस्येदमपग्राहं प्राणिमः KāṭhS. 26.10 (ii.135.12); KapiKaS. 41.8 (245.11)

**अपग्राहम्** (apagrāham) *adv.* by way of taking away or removing मारुतं चरुं निर्वपेत् ... हरितो रुक्मोऽपिधानस्यात्तस्यापग्राहमवद्येत् KāṭhS. 11.1 (i.143.2)

**अपघट्** (apa-ghaṭ-) I.A. (caus.) to shut up एकैकं च कपाटं पञ्च पञ्च पुरुषशतान्युद्घाटयन्ति स्म अपघटायन्ति स्म LaliVi. 14.0 (16) [MW.]

**अपघटयत्** (apa-ghaṭayat) *adj.* driving away, destroying मिथ्यावादान्धकारस्थितिमपघटयद्वाङ्मयूखप्रतानैः ... जगति विजयतां पुण्यमेतत्पुराणम् MahāP. 1.210; 23.195.

**अपघन** (apa-ghana) *n.* buttock श्वोऽमावास्येति गां कारयते। तस्याः सव्यं चापघनं प्रपाकं च निधाय। भिक्षां कारयति KauśiSū. 83.14; **2** body नाकीन्द्राः क्षालयांचक्रुः ... नेत्राण्यपघनान्यपि MahāP. 16.220.

**अपघन** (apa-ghana) *m.* [irregularly derived from apa-han-, P.iii.3.81; Liṅgānu. (Vā.) (c) 11.24; JaineVyā. 125.30 (*on* ii.3.69); CāndraVṛ. *on* i.3.66; KāśiVṛ. *on* iii.3.81; Nyās. i.704.24 (*on* ii.3.81) Kātan. iv.5.60; ŚākaṭāVyā. iv.4.20; SiddhHe. v.3.36.] **1** limb of the body व्रणिभिरपघनैर्घर्घराव्यक्तघोषान् ... घर्मांशोस्तस्य ... सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंघोविघातम् SūryaŚ.6; KāvyPra. 418.1; PrabaCin. 45.1(v.l.); श्रीमान् हेमशिलाघनैरपघनैः प्रांशुः प्रकृत्या गुरुः MahāP. 15.223; हित्वा तेषां घनमपघनं ... विश्वसाम्राज्यलक्ष्मीः स्वैरं भेजे ... सुराधीश्वरस्याङ्गसङ्गम् ŚrikaC. 24.23; स्याच्चेदम्बुरुहं द्विपस्य भयकृत् ... प्रत्यूहेत ततो निजैरपघनैरप्येतदुन्मूलने RājTa. (Ka.) 8.2524; हित्वैकमस्यापघनं विशन्ती तद्दृष्टिरङ्गान्तरभुक्तिसीमाम्। चिरं चकारोभयलाभलोभात्स्वभावलोला गतमागतं च NaiṣC. 8.11; रतिगृहजघने विपुलापघने मनसिजकनकासने GitGo. vii.15.5; दोर्भ्यां गृहीतमनुबिम्बमिदं स्वपीठे न्यसेत्पुंसकशिलाकलिताब्जनालम्। प्राक् प्रष्ठपार्ष्णिकनिजाणुगुणादिहूतिमूलाहितापघनभावितपारमात्म्यम् TantrSā. 6.41; अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम् AmaK. 1213; RājNi. 395.20; NāmMā.138; Vaija. 177.55; Abhindhā Cin. 566; ParyāŚaRa. 631; ŚabdaRa. (Vā.) 2122; ParaNā. 2101; KośaKaTa. 1.5054; KalpaK. 34.131; **2** body (वानराः) अपश्यन् ... लौहोद्धनघनस्कन्धा ललितापघनां स्त्रियम् Bhaṭṭi. 7.63; न नाम देवस्यापघने ... कोऽपि खेदः समपद्यत NalaCam. 7.10 (8); यो निजेऽपि शरीरेऽस्ति निर्ममत्वो महामुनिः। स ममत्वं कथं कुर्यादन्यस्यापघने परम् BṛKathāK. 29.24; विहायापघनं येन विष्णुलोकं समागताः। विष्णुलोके प्रभुञ्जानाभोगांस्तिष्ठन्ति ते परान् BṛKathāK. 55.287; पातालादुघतरविरथस्योल्लसिता विद्युत इवोदधिजलमवगाहमानर्घनैरपघनेभ्यो विश्लेषिताः ... कन्यका झगित्यद्राक्षम् TilaMañ. 158.23; घनघर्मजलच्छलेन बहिरुद्वहता परिप्लावितापघनस्य ... यान्ति मध्याह्नसमयाः YaśasCam. i.71.15; मोहानिलविजृम्भणादिव घनतरं तरंगयितव्यमपघनेन YaśasCam. ii.69.2; ii.208.4 निजकीर्तिसुधाधवलितापघनं त्रिभुवनमेव विहारहर्म्याणि YaśasCam. ii.240.7; ii.295.11; कीनाशदिशि पवनाशनेश्वरशरीरशयनाश्रितापघनम् ... स विद्याधरः समस्तमपि नगरं क्षोभयामास YaśasCam. ii.299.24; घोटः कीर्तेर्घनाभापघनगजघटाघातनैर्घृण्यनिघ्नो घूर्णति ... घोरोऽस्य खड्गः KhaḍgaŚ.4.

**अपघन** (apa-ghana) *adj.* [*f.* –ā] **1** free from the obstruction of clouds, cloudless तत्तनयाः ... भगवन्तमपघने शरत्कालेऽर्कमिव ... कपिलर्षिमपश्यन् ViṣṇuP. iv.4.20; शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनर्घर्घराव्यक्तघोषान् ... घर्मांशोस्तस्य ... सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम् SūryaŚ.6; KāvyaPra. 418.1; PrabaCin. 45.1(v.l.); **2** not fat, i.e. light or slim यदि बृहज्जघनापघना तनुर्यदि ... वहति कस्य कृते मदनो धनुः SaduktiKa. 141.14; पृथिवीनाथं नेत्रयोरतिथीचकार उपधन (अपघन) पाणिः ... आत्मनः संज्ञां पुरस्तात्प्राचीकशत् ŚukSa. 22.6.

**अपघनघटितघुसृणघनसार** (apaghanaghaṭita-ghusṛnaghanasāra) *adj.* who has applied camphor and saffron to the body अपघनघटितघृसृणघनसार ... जय जय बल्लवराजकुमार StavMā. 280.26.

**अपघनज** (apaghana-ja) *m.* produced from body, i.e. son देहापघनकायाङ्गं वपुः संहननं तनुः। ...अस्मिन् भवः सुतः (अपघनजः) Bhāṣya *on* NāmMā.39.

**अपघनभव** (apaghana-bhava) *m.* produced from body, i.e. son देहापघनकायाङ्गं वपुः संहननं तनुः। ... अस्मिन् भवः सुतः (अपघनभवः) Bhāṣya *on* NāmMā. 39.

**अपघनान्वित** (apaghanānvita) *adj.* associated with body जिनदासो जगादैतं धर्मं वाऽपघनान्वितम् BṛKathāK. 65.36; धर्मं वाऽपघनान्वितम्। ... मुनिं वृक्षसमीपस्थं चण्डकर्मा ददर्श सः BṛKathāK. 73.121.

**अपघनी** (apa-ghanī) *f.* buttock मध्यमायां गां कारयेत्तामष्टकायै प्रोक्षेत्तस्यास्त्रीणि सव्यान्युपोद्धरति पार्श्वमपघनीं श्रोणीमिति JaimiGS. 2.3 (29.4)

**अपघनोपेत** (apaghanopeta) *adj.* associated with body, having body दृष्ट्वैनं योगिनं तत्र ... धर्मं वापघनोपेतं ... परिध्यातमिदं मया BṛKathāK. 56.198.

**अपघर्ष** (apa-gharṣa) *m.* act of rubbing, i.e. act of brushing गन्धानुलिप्तकरयोस्तु मिथोऽपघर्षात्तालत्रयास्त्ररववारितविघ्नसङ्घः ĪśānŚiPa. ii.3.58.

**अपघाटलीका** (apaghāṭalīkā) *f.* type of musical instrument सप्तशीतिर्महाव्रतस्य स्तोत्र्या भवन्ति त्रयोदश परिमादः। ... क्षुद्राः परिमादः ... चैषीकी चापघाटलीका JaimiBr. 2.404.

**अपघाटिला** (apa-ghāṭilā) *f.* kind of lute, तं पत्न्योऽपघाटिलाभिरुपगायन्त्यार्त्विज्यमेव PañcBr. v.6.8 (comm. उपमुखं स्थापयित्वा मुखमारूतेन वाद्यमाना वीणापघाटिला इत्याचक्षते) उपमुखं पिछोरां वादनेन काण्डमयीम्। ता अपघाटिला इत्याचक्षते LāṭŚS. iv.2.7; DrāhyāŚS. xi.2.8; ताः प्रतिमन्त्रयेत यां पत्न्यपघाटिलां मृदुकं वादयिष्यति सारातिमपबाधतां द्विषन्तं तैजनित्वगिति DrāhyāŚS. xi.2.9.

**अपघात** (apa-ghāta) *m.* [P.ii.3.81; KāŚiVṛ. *on* iii.3.81; JaineVyā. ii.3.69 (125.30); Kātan. iv.5.60; Prasā. ii.658.13; SidhāKau. 573A.16 (*on* iii.3.81)] **1** act of striking off, act of warding off मे होचुर्न वाऽअस्यान्येन सत्त्रादपघातोऽस्ति हन्त सत्त्रमासामहा इति ŚatBr. Xi.v.5.1; वत्सलाः सर्वभूतानां वाचयाः श्रोत्रसुखा गिरः। परिवादोषघातौ च (v.l. परितापोऽपघातश्च) पारुष्यं चात्र गर्हितम् MahāBhā. xii.184.14; **2A** damage, destruction ईडेद्यावीयमार्त्येदातमसोपघातात् ĀśvŚS.I.iv.15.9; कप्पायमुक्तं कथितं चरित्रं कप्पायवृद्धावपघातमेति SubhāRaSaṁ.233; भौमोऽयं नरकः ... करोति सर्वभूतानामपघातमरिन्दम BrahmP. 202.8; वेत्सि तीर्थानि चारकैः। ... तद्यदि कुत्सितं भवति तत्स्वामिनोऽपघाताय Pañcā. 179.33; **2B** act of hurting, act of killing न परस्य कश्चिदपघातमपि च सघृणो व्यचिन्तयत् Saund. 3.35; **3** a violent death, any evil accident proving fatal, Apte.

**अपघातक** (apa-ghātaka) *adj.* terminating or destroying दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ SāṁkhyaKā. 1.

**अपघातन** (apa-ghātana) *n.* act of killing वने निरपराधानां प्राणिनां चापघातनम् ŚivaP. v.5.34 (411B.11)

**अपघातिन्** (apa-ghātin) *adj.* killing, murdering, Apte.

**अपघातमृत** (apaghāta-mṛta)) *adj.* (used as noun) (one) died of an accident अपघातमृतेनापि दूषितम् ...। गृहं विशोधयेत् होमैर्व्याहृत्या शत संख्यकैः MahNirvāT. 11.156.

**अपघृण** (apa-ghṛṇa) *adj.* unkind, pitiless न च कार्श्यदशां नतभ्रुवं मदनो ज्याम् ... विररामापघृणोऽधिरोपयन् HarVi. 24.15; मयि स्नेहाद्बाष्पस्थगितनयनायामपघृणो रुदत्यां यो यातस्त्वयि स विलपत्येष्यति कथम् Subhāṣi. 1140; एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिनाम् RasGaṅ. 670.12; Bhāmivi. 1.65.

**अपघ्नत्** (apa-ghná(n)t) *adj.* [*f.* –ntī] **1** slaying, chasing off, beating off तं त्वां वयं हवामहे ... अग्ने घ्नन्तमप द्विषः ṚV. viii.43.23; SV.